नामांक　　　　　　Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 27

# P—95—Sanskrit (V) (Supp.)

No. of Printed Pages — 7

# प्रवेशिका पूरक परीक्षा, 2013

## संस्कृतविशेषः

समय : $3\frac{1}{4}$ होराः

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया ।

(5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः ।

1. ''अतोऽम'' इति सूत्रस्यार्थं लिखत । 1

2. निर्देशानुसारं रूपाणि लिखत — $\frac{3}{4} + \frac{3}{4} = 1\frac{1}{2}$

(अ) युष्मद् शब्दस्य प्रथमा विभक्तेः ।

(ब) रमा शब्दस्य तृतीया विभक्तेः ।

3. निम्न पदयोः मूल शब्दं विभक्तिं वचनं च लिखत — $\frac{3}{4} + \frac{3}{4} = 1\frac{1}{2}$

(अ) अहम्

(ब) रमाम् ।

4. निर्देशानुसारं धातु रूपाणि लिखत — $\frac{3}{4} + \frac{3}{4} = 1\frac{1}{2}$

(अ) 'अद्' धातोः लट् लकारे प्रथम पुरुषस्य रूपाणि लिखत ।

(ब) 'डुकृञ्' धातोः लृट् लकारे मध्यम पुरुषस्य रूपाणि लिखत ।

5. निम्न पदयोः लकारं पुरुषं वचनं च लिखत — $\frac{3}{4} + \frac{3}{4} = 1\frac{1}{2}$

(अ) चोरयति

(ब) क्रेष्यति ।

6. वाच्य-परिवर्तनं कुरुत — 1 + 1 = 2

(अ) अहं पुस्तकं पठामि ।

(ब) रामेण पुस्तकं पठ्यते ।

7. ''हरिं भजति'' इत्यत्र केन सूत्रेण द्वितीया भवति ? 2

8. ''अमिपूर्वः'', ''सुपि च'', ''जसः शी'' इति सूत्रेषु द्वयोः सूत्रयो अर्थो लेख्यः । 1 + 1 = 2

9. "औङ आप:", "याडाप:", "ऋन्नेभ्योङीप्" इति सूत्रेषु द्वयो: सूत्रयो: अर्थो लेख्य: ।

$1 + 1 = 2$

10. "क्त्वातो सुन्कसुन", "कृन्मेजन्त:", "अव्ययीभावश्च" इति सूत्रेषु द्वयो सूत्रयो: अर्थो लेख्य: ।

$1 + 1 = 2$

11. "अधिशीङ्स्थासां कर्म", "सहयुक्तेऽप्रधाने" इत्यनयो: सूत्रयो: सोदाहरणम् अर्थो लेख्य: ।

$1\frac{1}{2} + 1\frac{1}{2} = 3$

12. निम्नाङ्कितेषु छन्द: सु कयोश्चित् **द्वयो:** लक्षणोदाहरणानि लेख्यानि — $1\frac{1}{2} + 1\frac{1}{2} = 3$

(अ) हरिणी

(ब) मालिनी

(स) स्रग्धरा: ।

13. अधोलिखितेषु अलङ्कारेषु **द्वयो:** लक्षणमुदाहरणञ्च लिखत — $1\frac{1}{2} + 1\frac{1}{2} = 3$

(अ) प्रतिवस्तूपमा

(ब) परिकर:

(स) अर्थान्तरन्यास: ।

14. प्रात:, युगपत्, पृथक्, दिवा एषु त्रयाणाम् अव्ययपदानाम् अर्थं विलिख्य वाक्य-प्रयोग: करणीय: । $1 + 1 + 1 = 3$

15. निम्नलिखित शब्दानां पर्यायत्रयं लिखत — $1 + 1 + 1 + 1 = 4$

(i) स्त्री

(ii) पुत्री

(iii) पिता

(iv) शरीर: ।

16. अधोलिखितेषु प्रश्नेषु यथेच्छं **चत्वार:** प्रश्ना: समाधेया: — 1 + 1 + 1 + 1 = 4

(i) वेदा: कति सन्ति ?

(ii) भारतस्य प्रमुखा: पर्वता के ?

(iii) सतां किं लक्षणम् ?

(iv) हरनामामृते महाकाव्ये कियन्त: सर्गा: सन्ति ?

(v) रामदेव: कुत्र दत्त लक्ष्य: ?

(vi) केभ्य: नरेभ्य: नम: ।

17. निम्नलिखितेषु प्रश्नेषु यथेच्छं **पञ्च**प्रश्ना: समाधेया: 1 + 1 + 1 + 1 + 1 = 5

(i) स्वमूर्खपुत्रान् विलोक्य सचिवानाहूय राजा किं प्रोवाच ?

(ii) महिलारोप्यं नाम नगरं कुत्रासीत् ?

(iii) धनार्थं क एक उपाय: शस्यते ?

(iv) उदकार्थं सिंह: कुत्रागच्छत ?

(v) दमनक: सिंह किमपृच्छत् ?

(vi) आगते बिडाले मूषक: किमकरोत् ?

(vii) कस्य राज्यं नश्यति ?

18. अधोलिखितयो: कथयो: **एकस्या** सारांशं संस्कृते लिखत — 2

(i) करालकुट्टिनी कथा ।

(ii) सिंह-दधिकर्ण ( बिडाल ) कथा ।

19. अधोलिखितेषु प्रयोगेषु **द्वयोः** ससूत्रं सिद्धिः कार्या — $2\frac{1}{2} + 2\frac{1}{2} = 5$

रामाः, सर्वे हरयः, क्रोष्टा, नृणाम् ।

20. निम्नलिखितेषु प्रयोगेषु **द्वौ** प्रयोगौ साधनीयौ — $2\frac{1}{2} + 2\frac{1}{2} = 5$

रमे, सर्वस्यै, मत्याम् , तिस्रः ।

21. अधोलिखितेषु प्रयोगेषु **द्वयोः** ससूत्रं सिद्धिः कार्या — $2\frac{1}{2} + 2\frac{1}{2} = 5$

ज्ञाने, कतरत्, दध्नि, वारि ।

22. अधोलिखितेषु प्रयोगेषु **पञ्च** प्रयोगाणां ससूत्रं निर्देशपूर्वकं सिद्धिः कार्या —

$1 + 1 + 1 + 1 + 1 = 5$

(i) गां दोग्धि पयः

(ii) अधिशेते वैकुण्ठं हरिः

(iii) उपवसति वैकुण्ठं हरिः

(iv) रामेण बाणेन हतो बाली

(v) अक्ष्णा काणः

(vi) ब्रह्मणः प्रजाः प्रजायन्ते

(vii) सतां गतम्

(viii) कटे आस्ते ।

23. **कस्याप्येकस्य** गद्यांशस्य सप्रसङ्गं व्याख्या कार्या — 3

अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम् । तत्र धर्मोपार्जितभूरिविभवो वर्धमानो नाम वणिक्पुत्रो बभूव । तस्य कदाचित् रात्रौ शय्यारूढस्य चिन्ता समुत्पन्ना, यत् प्रभूतेऽपि वित्तेऽर्थोपायाश्चिन्तनीयाः करणीयाश्चेति ।

**अथवा**

अस्त्युत्तरापथेऽर्बुदशिखरनाम्नि पर्वते दुर्दान्तो नाम महाविक्रमः सिंहः । तस्य पर्वत कन्दरम् अधिशयानस्य केसराग्रं कश्चन मूषकः प्रत्यहमागत्य छिनत्ति । तत् स्वकेसराग्रं लूनं दृष्टा कुपितो हि विवरान्तर्गतं दुष्टात्मानं मूषकमलभमानो मनसि चिन्तयामास ।

24. **कस्याप्येकस्य** श्लोकस्य सप्रसङ्गान्वयपूर्वकं व्याख्या कार्या — 3

(i) मानवामानितं दानवा बाधितं,
निर्जराराधितं सज्जनासाधितम् ।
पण्डितैः पूजितं पक्षिभिः कूजितं,
भूतले भाति मेऽनारतं भारतम् ॥

(ii) विपदि धैर्यमथाभ्युदये क्षमा,
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ,
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

25. अधोलिखितयोः श्लोकयोः **एकस्य** सप्रसङ्गान्वयपूर्वकं भावार्थो लेख्य — 3

(i) आर्यभट्टं वियन्मण्डले स्थापयत्,
पोखरण् भूमिगर्भेऽणु शक्तिं किरत् ।
शान्ति कार्येष्वणु प्रेरयत्सन्ततं,
भूतले भाति मेऽनारतं भारतम् ॥

(ii) रम्ये क्वचित् सैकतव प्रसानौ
सुकोमले भास्वति हेमवर्णे ।
प्रातः प्रदोषे च सुखं स्थितस्य,
न कस्य चेतः स्वविकासमेति ॥

26. **कमप्येकं** विषयमवलम्ब्य शतपदेषु संस्कृते निबन्धो लेखनीयः — 4

(i) परोपकाराय सत्तां विभूतयः ।

(ii) अस्माकं विद्यालयः ।

27. अहमस्मि सुरेशः इति मत्वा राजकीय प्रवेशिका संस्कृत विद्यालय जयपुरस्थस्य प्रधानाध्यापकाय दिन द्वयस्य अवकाशाय प्रार्थनापत्रं लिखत । 3

**अथवा**

संस्कृत शिक्षक पदे शिक्षा निदेशालयाय नियुक्त्यर्थमावेदन पत्रं लिखत ।